## विषयानुक्रमणिका

1. यज्ञोपवीतधारणम्
2. सन्ध्यावन्दनम्
3. ब्रह्मयज्ञः
4. हिरण्यकेशिनां वेदोपाकरणप्रयोगः
5. अमातर्पणम्
6. समिदाधानम्
7. अग्निसन्धानम्
8. औपासनम्
9. स्थालीपाकः
10. अग्नि – आत्मसमारोपणम्
11. अग्नि – समित्समारोपणम्
12. अग्न्यवरोपणम्
13. पुयाहवाचनम्
14. श्राद्धप्रयोगः
15. पिण्डप्रदानम्
16. परेऽहनि तर्पणम्

Formatted: Font: 12 pt

॥ ॐ ॥ श्रीः ॥

॥ श्री सत्याषाढगुरुचरणारविन्दाभ्यां नमः ॥

॥ **यज्ञोपवीतधारणम्** ॥

आचमनम् ॥ प्राणायामः ॥ संकल्पः ॥

शुक्लाम्बर ++ शान्तये ॥ ओं भूः ++ सुवरोम् ॥

ममोपात्त समस्त दुरितक्षयद्वारा परमेश्वराज्ञया परमेश्वरप्रीत्यर्थं मम समस्तपापक्षयार्थं श्रौतस्मार्तविहित नित्यकर्मानुष्ठानयोग्यतासिद्ध्यर्थं ब्रह्मतेजोऽभिवृद्ध्यर्थं यज्ञोपवीतधारणं करिष्ये ॥

ॐ अस्यश्री यज्ञोपवीतधारण महामन्त्रस्य परब्रह्म ऋषिः त्रिष्टुप् छन्दः परमात्मा देवता | यज्ञोपवीतधारणे विनियोगः |

यज्ञोपवीतं परमं पवित्रं प्रजापतेः यत्सहजं पुरस्तात् |
आयुष्यमग्रयं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ||
*यज्ञोपवीतं धृत्वा आचम्य* | यज्ञस्य उपवीतेन उपव्यायामि | दीर्घायुत्वाय सुप्रजास्त्वाय सुवीर्याय | यशसे ब्रह्मणे ब्रह्मवर्चसायत्वा | सर्वेषां वेदानां आधिपत्याय ||

*जीर्णयज्ञोपवीतं विसृजेत्* |

उपवीतं भिन्नतन्तुं जीर्णं कश्मलदूषितम् | विसृजामि नहि ब्रह्म वर्चो दीर्घायुरस्तु मे || (*इति प्राक्तनं उपवीतं विसृजेत्*)

*आचामेत्* ||

8*******8*******8

|| **सन्ध्यावन्दनम्** ||

**आचमनम्** – अच्युताय नमः| अनन्ताय नमः| गोविन्दाय नमः||

केशव – नारायण – माधव – गोविन्द – विष्णो – मधुसूदन – त्रिविक्रम – वामन – श्रीधर – हृषीकेश – पद्मनाभ – दामोदर ||

**प्राणायामः** --- ओं भूः ओं भुवः ओँ सुवः ओं महः ओं जनः ओं तपः ओँ सत्यं | ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि | धियो यो नः प्रचोदयात् | ओमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ||

**संकल्पः** --- ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वराज्ञयया श्री परमेश्वरप्रीत्यर्थं (*प्रातः*) प्रातस्सन्ध्यां उपासिष्ये (*मध्यान्हे*) माध्यान्हिकं करिष्ये (*सायं*) सायंसन्ध्यां उपासिष्ये (என்று ஸங்கல்பம் பிறகு) ओं केशवाय नमः (என்று மோதிர விரலால் ஜலத்தில் ப்ரணவத்தை எழுதி நெற்றிக்கிட வேண்டும்)

**मार्जनम्** : ओं आपो हि ष्ठा मयोभुवः | ता न ऊर्जे दधातन | महे रणाय चक्षसे यो वश्शिवतमो रसः तस्य भाजयतेह नः | उशतीरिव मातरः | तस्माअरं गमाम वः | यस्य क्षयाय जिन्वथ | आपो जनयथा च नः | ओं भूर्भुवस्सुवः | (*जलेन आत्मानं परिषिच्य*)

**अपः प्राशनम्** – (காலையில்) सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः | पापेभ्यो रक्षन्ताम् | यद्रात्र्या पापमकार्षम् | मनसा वाचा हस्ताभ्याम् | पद्भ्यां उदरेण शिश्ना | रात्रिस्तदवलुंपतु | यत्किञ्च दुरितं मयि | इदमहं माममृतयोनौ | सूर्ये ज्योतिषि जुहोमि स्वाहा |

(*मध्यान्हे*) आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् । पुनन्तु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु माम् ॥ यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम। सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहँ स्वाहा ॥

(*सायं*) अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षन्ताम्। यदह्ना पापमकार्षम् । मनसा वाचा हस्ताभ्याम् । पद्भ्यां उदरेण शिश्ना । अहस्तदवलुंपतु। यत्किञ्च दुरितं मयि। इदमहं माममृतयोनौ। सत्ये ज्योतिषि जुहोमि स्वाहा।

**पुनः मार्जनम्** – दधिक्राव्णो अकारिषम्। जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखाकरत् । प्रण आयूँषि तारिषत् । आपो हि ष्ठा मयोभुवः । ता न ऊर्जे दधातन । महे रणाय चक्षसे यो वश्शिवतमो रसः तस्य भाजयतेह नः । उशतीरिव मातरः। तस्माअरं गमाम वः। यस्य क्षयाय जिन्वथ। आपो जनयथा च नः। ओं भूर्भुवस्सुवः। (*जलेन आत्मानं परिषिव्य*)

**अर्घ्यप्रदानमन्त्रः** -- ओं । भूर्भुवस्सुवः । तत्सवितुर्वरेण्यम् । भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ (மும்முறை – தமிழில் உள்ளபடி)

असावादित्यो ब्रह्मा। ब्रह्मैव सत्यम्। ब्रह्मैवाहमस्मि ॥

**तर्पणम्** – आदित्यं तर्पयामि । सोमं तर्पयामि। अङ्गारकं तर्पयामि। बुधं तर्पयामि । बृहस्पतिं तर्पयामि । शुक्रं तर्पयामि । शनैश्चरं तर्पयामि । राहुं तर्पयामि । केतुं तर्पयामि । केशवं तर्पयामि । नारायणं तर्पयामि । माधवं तर्पयामि । गोविन्दं तर्पयामि । विष्णुं तर्पयामि । मधुसूदनं तर्पयामि । त्रिविक्रमं तर्पयामि । वामनं तर्पयामि । श्रीधरं तर्पयामि । हृषीकेशं तर्पयामि । पद्मनाभं तर्पयामि । दामोदरं तर्पयामि ।

*आचमनम्*

**जपः**

**संकल्पः -- शुक्लाम्बर ++ शान्तये ॥ प्राणायामः ॥**

ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वराज्ञया श्रीपरमेश्वरप्रीत्यर्थं (*प्रातः*) प्रातस्सन्ध्या गायत्रीमहामन्त्रजपं करिष्ये । (*माध्यान्हे*) माध्यान्हिक गायत्री महामन्त्रजपम् करिष्ये। (*सायंकाले*) सायंसन्ध्यां गाय्त्री महामन्त्रजपम् करिष्ये।

**प्राणायामः** प्रणवस्य ऋषिर्ब्रह्म देवी गायत्री छन्दः परमात्मा देवता।

भूरादिसप्तव्याहृतीनां अत्रि भृगु कुत्स वसिष्ठ गौतम काश्यप आङ्गीरस ऋषयः गायत्री उष्णिक् अनुष्टुप् बृहती पङ्ति त्रिष्टुप् जगत्यः छन्दांसि, अग्नि वायु अर्क वागीश वरुण इन्द्र विश्वे देवा देवताः।

सावित्र्या ऋषि : विश्वामित्र : देवी गायत्री छन्दः सविता देवता।

गायत्रीशिरसो ब्रह्मा ऋषिः अनुष्टुप् छन्दः परमात्मा देवता।

प्राणायामजपे विनियोगः

**प्राणायामजपः** (दश वारम् )

**गायत्र्यावाहनम्:-**

आयातु वरदा देवी अक्षरं ब्रह्म संमितम् | गायत्रीं छन्दसां माता इदं ब्रह्म जुषस्व नः | ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुः अभिभूरों गायत्रीं आवाहयामि, सावित्रीं आवाहयामि, सरस्वतीं आवाहयामि ||

सावित्र्या ऋषिः विश्वामित्रः देवीगायत्रीछन्दः सविता देवता गायत्रीमहामन्त्रजपे विनियोगः |

**ध्यानम्**

मुक्ताविद्रुमहेमनीलघवळच्छायैर्मुखैस्त्रीक्षणैः
युक्तामिन्दुकलानिबद्धमकुटां तत्त्वार्थवर्णात्मिकाम् |
गायत्रीं वरदाभयाङ्कुशकशाः शुभ्रं कपालं गदां
शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ||
यो देवः सविताऽस्माकं धियो धर्मादिगोचराः |
प्रेरयेत् तस्य यत् भर्गः तद्वरेण्यमुपास्महे ||

**गायत्रीमहामन्त्रः** ओं | भूर्भुवस्सुवः | तत्सवितुर्वरेण्यम् | भर्गो देवस्य धीमहि | धियो यो नः प्रचोदयात् ||

**गायत्र्युद्वासनम्**

*प्रातः* --- प्रातस्सन्ध्यागायत्र्युपस्थानं करिष्ये |

*मध्यान्हे* – माध्यान्हिक गायत्र्युपस्थानं करिष्ये |

*सायं* – सायंसन्ध्या गायत्र्युपस्थानं करिष्ये |

उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि |

ब्राह्मणेभ्योऽह्यनुज्ञाता गच्छ देवि यथा सुखम् ||

**प्रार्थना –** (*प्रातः*) मित्रस्य चर्षणी धृतः श्रवो देवस्य सानसिम् | सत्यं चित्रश्रवस्तमम् | मित्रो जनान् यातयति प्रजानन्मित्रो दाधार पृथिवीमुत द्याम् | मित्रः कृष्टीरनिमिषाऽभिचष्टे सत्याय हव्यं घृतवद्विधेम | प्र स मित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन | न हन्यते न जीयते त्वोतो नैनमँहोअश्नोत्यन्तितो न दूरात् ||

*(माध्यान्हे)* आसत्येन रजसा वर्तमानो निवेशयन् अमृतं मर्त्यञ्च | हिरण्ययेन सविता रथेनाऽऽदेवो याति भुवना विपश्यन् | उद्वयं तमसस्परि पश्यन्तो ज्योतिरुत्तरम् | देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् | उदुत्यं जातवेदसं देवं वहन्ति केतवः | दृशे विश्वाय सूर्यम् | चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः | आ प्रा द्यावापृथिवी अन्तरिक्षँ सूर्य आत्मा जगतस्तस्थुषश्च | तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् | पश्येम शरदश्शतं, जीवेम शरदश्शतं

,नन्दाम शरदश्शतं, मोदाम शरदश्शतं, भवाम शरदश्शतं, शृणवाम शरदश्शतं, प्रब्रवाम शरदश्शतं, अजीतास्याम शरदश्शतं ज्योक् च सूर्यं दृशे | य उदगान्महतोऽर्ण वाद्विभ्राजमानस्सरिश्स्य मध्यात्समावृषभो लोहिताक्षस्सूर्यो विपश्चिन्मनसा पुनातु ||

(*सायं*) इमं मे वरुण श्रुधीहव मद्या च मृडय | त्वामवस्युराचके | तत्वा यामि ब्रह्मणावन्दमानस्तदाशास्ते यजमानो हविर्भिः | अहेडमानो वरुणेहबोध्युरुशँ स मान आयुः प्रमोषीः | यच्चिद्धि ते विशो यथा प्रदेव वरुण व्रतम् | मिनीमसि द्यविद्यवि | यत्किञ्चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याष्चरामसि | अचित्ती यत्तवधर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः | कितवासो यद्रिरिपुर्न दीवि यद्वाघा सत्यमुत यन्न विद्म | सर्वा ता विष्य शिथिरेव देवाथा ते स्याम वरुण प्रियासः ||

**दिग्देवतावन्दनम्** --- सन्ध्यायै नमः, सावित्र्यै नमः , गायत्र्यै नमः , सरस्वत्यै नमः , सर्वाभ्यो देवताभ्यो नमः |

कामोऽकार्षीन्मन्युरकार्षीन्नमो नमः

अभिवादये ------- *आर्षेयप्रवरान्वित* ----- गोत्रः --- सूत्रः --- शाखाध्यायी ------ शर्मानामाहं अस्मि भोः ||

प्राच्यै दिशे नमः , दक्षिणायै दिशे नमः, प्रतीच्यै दिशे नमः, उदीच्यै दिशे नमः उर्ध्वायै नमः, अधरायै नमः, अन्तरिक्षाय नमः, भूम्यै नमः, ब्रह्मणे नमः, विष्णवे नमः, यमाय नमः ||

(*दक्षिणायै दिशे*) यमाय धर्मराजाय मृत्यवे चान्तकाय च | वैवस्वताय कालाय सर्वभूतक्षयाय च | औदुंबराय दध्नाय नीलाय परमेष्ठिने | वृकोदराय चित्राय चित्रगुप्ताय वै नमः || चित्रगुप्ताय वै नम ओं नम इति ||

(*प्रतीच्यै दिशे*) ऋतँ सत्य परं ब्रह्म पुरुषं कृष्णपिङ्गलम् | ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ||

(*उदीच्यै दिशे*) नर्मदायै नमः प्रातः नर्मदायै नमो निशि | नमोऽस्तु नर्मदे तुभ्यं त्राहि मां विषसर्पतः || जरत्कारोर्जरत्कार्वां समुत्पन्नो महायशाः अस्तीकस्सत्य सन्धो मां पन्नगेभ्योऽभिरक्षतु ||

अपसर्प सर्प भद्रं ते दूरं गच्छ महायशः | जनमेजयस्य यज्ञान्ते अस्तीकवचनं स्मरन् ||

(*प्रातः, माद्यान्हे - प्राच्यै दिशे*) (*सायं - प्रतीच्यै दिशे*) नमस्सवित्रे जगदेकचक्षुषे जगत्प्रसूति स्थितिनाशहेतवे | त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायणशङ्करात्मने || ध्येस्सदा सवितृमण्डल मध्यवर्ती नारायणः सरसिजासनसन्निविष्टः | केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयविपुः धृतशङ्खचक्रः || शङ्खचक्रगदापाणे द्वारकानिलयाच्युत |

गोविन्द पुण्डरीकाक्ष रक्ष मां शरणागतम् | आकाशात् पतितं तोयं यथा गच्छति सागरम् | सर्वदेवनमस्कारः केशवं प्रतिगच्छति ॥ श्री केशवं प्रतिगच्छत्योन्नम इति ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात् | करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥ प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै | यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥ कृष्ण कृष्ण कृष्ण ॥

*ஜபம் செய்த இடத்தில் ப்ரோக்ஷணம்*

अद्यानो देव सवितः प्रजावत्सावीस्सौभगम् | परा दुष्वप्नियँ सुव | विश्वानि देव सवितर्दुरितानि परासुव | यद्भद्रं तन्म आसुव ॥

॥ **ब्रह्म यज्ञः** ॥

*आचम्य* **|** शुक्लाम्बभर ++ शान्तये **||** *प्राणायामः* **||**

ममोपात्त समस्त दुरितक्षयद्वारा परमेश्वराज्ञया श्रीपरमेश्वरप्रीत्यर्थं ब्रह्मयज्ञंज्ञ करिष्ये| ब्रह्मयज्ञेन यक्ष्ये | विद्युदसि विद्य मे पाप्मानं ऋतात् सत्यं उपैमि ॥ ओं भूः तत्सवितुर्वरेण्यम् | ओं भुवः भर्गो देवस्य धीमहि | ओँ सुवः धियो यो नः प्रचोदयात् | ओं भूः तत्सवितुर्वरेण्यम् भर्गो देवस्य धीमहि | ओं भुवः धियो यो नः प्रचोदयात्| ओँ सुवः तत्सवितुर्वरेण्यम् भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् | ओं भूर्भुवस्सुवः तत्सवितुर्वरेण्यम् भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥ ओं | अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् | होतारं रत्नधातमम् ॥ हरिः ओं ॥ हरिः ओं | इषे त्वोर्जे त्वा वायवस्थोपायवस्थ देवो वस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥ हरिः ओं ॥ हरिः ओं | अग्न आयाहि वीतये गृणानो हव्यदातये | निहोता सत्सिसस्सि बर्हिषि॥ हरिः ओं ॥ हरिः ओं |शन्नो देवीरभिष्टये आपो भवन्तु पीतये | शंयो रभिस्रवन्तु नः हरिः ओं ॥ हरिः ओं ॥

स्वस्ति न इन्द्रो वृद्धश्रवास्स्वस्ति नः पूषा विश्ववेदाः | स्वस्ति न स्ताक्ष्यो अरिष्टनेमिस्स्वस्ति नो बृहस्पतिर्दधातु ॥

पयः पृथिधिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाम् | पयस्वतीः प्रदिशः सन्तु मह्यम् ॥

विष्णोः रराटमसि विष्णो पृष्ठमसि विष्णोश्श्नश्श्रप्त्रे स्थो वोविष्णोस्स्यूरसि वोविष्णोर्ध्रुवमसि वैश्णष्णवमसि विष्णवे त्वा ॥

अग्निर्देवता वातो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽऽदित्येत्या देवता विश्वेदेवा देवता मरुतो देवता बृहस्पतिर्देवतेतन्द्रो देवता वरुणो देवता ॥

सत्यं तपः श्रद्धायां जुहोमि ॥

ओं नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः | नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि ॥ (*एवं त्रिः* )

वृष्टिरसि ~~वृक्ष्च~~ वृश्च मे पाप्मानं ऋतात् सत्यमुपागाम् | देव ऋषि पितृ तर्पणं करिष्ये-

ब्रह्माणं तर्पयामि | प्रजापतिं तर्पयामि | बृहस्पतिं तर्पयामि | अग्निं तर्पयामि | वायुं तर्पयामि | सूर्यं तर्पयामि | चन्द्रमसं तर्पयामि | नक्षत्राणि तर्पयामि | इन्द्रम् राजानं तर्पयामि | यमं ~~र~~राजानं तर्पयामि | वरुणं राजानं तर्पयामि | सोमं राजानं तर्पयामि | वैश्रवणं राजानं तर्पयामि | वसूंस्तर्पयामि | रुद्रांस्तर्पयामि | आदित्यांस्तर्पयामि | विश्वान्देवांस्तर्पयामि | साद्ध्यांस्तर्पयामि | ऋभूंस्तर्पयामि | भृगूंस्तर्पयामि | मरुतस्तर्पयामि | अथर्वणस्तर्पयामि | अङ्गिरसस्तर्पयामि | कल्पं तर्पयामि |

(*निवीती*) विश्वामित्रं तर्पयामि | जमद~~ग्निं~~ग्निं तर्पयामि | भरद्वाजं तर्पयामि | अत्रिं तर्पयामि | वसिष्ठं तर्पयामि | अरुन्धतीं तर्पयामि | कश्यपं तर्पयामि | कृष्णद्वैपायनं तर्पयामि | जातूकर्ण्यं तर्पयामि | तरुक्षं तर्पयामि | तृणबिन्दुं तर्पयामि | वर्मिणं तर्पयामि | वरूथिनं तर्पयामि | वाजिनं तर्पयामि | वाजश्रवसं तर्पयामि | स~~थ्य~~त्यश्रवसं तर्पयामि | सुश्रवसं तर्पयामि | सुतश्रवसं तर्पयामि | सोमशुष्मायणं तर्पयामि | सत्ववतं तर्पयामि | बृहदुक्थं तर्पयामि | वामदेवम् तर्पयामि | वाजिरत्नं तर्पयामि | हर्यज्वायनं तर्पयामि | उदमयं तर्पयामि | गौतमं तर्पयामि | ऋणंजयं तर्पयामि | ऋतंजयं तर्पयामि | कृतंजयं तर्पयामि | धनंजयं तर्पयामि | बभ्रुं तर्पयामि | त्र्यरुणं तर्पयामि | त्रिवर्षं तर्पयामि | त्रिधातुं तर्पयामि | शीघ्रं तर्पयामि | हव्यवाहनं तर्पयामि | पराशरं तर्पयामि | विष्णुं तर्पयामि | रुद्रं तर्पयामि | स्कन्दं तर्पयामि | काशीश्वरं तर्पयामि | ज्वरं तर्पयामि | धर्मं तर्पयामि| ~~अर्धं~~अर्थं तर्पयामि | कामं तर्पयामि | क्रोधं तर्पयामि | वसिष्ठं तर्पयामि | इन्द्रं तर्पयामि | त्वष्टारं तर्पयामि | कर्तारं तर्पयामि | धर्त्तारं तर्पयामि | धातारं तर्पयामि | मृत्युं तर्पयामि | सवितारं तर्पयामि | गायत्रीं तर्पयामि | सावित्रीं तर्पयामि | सरस्वतीं तर्पयामि |

கீழ்வரும் 5 தர்பணங்களையும் முழங்கையால் ஜலம் விழும்படி செய்யவும்.

प्राजापतिं काण्डऋषिं तर्पयामि | सोमं काण्डऋषिं तर्पयामि | अग्निं काण्डऋषिं तर्पयामि | विश्वान्देवान् काण्डऋषिं तर्पयामि | स्वयंभुवं काण्डऋषिं तर्पयामि |

सदसस्पतिं तर्पयामि | ऋग्वेदं तर्पयामि | यजुर्वेदं तर्पयामि | सामवेदं तर्पयामि | अथर्ववेदं तर्पयामि | इतिहासपुराणं तर्पयामि |

(*प्राचीनावीती*)

वैशंपायनं तर्पयामि | पलिङ्गुं तर्पयामि | तित्तिरं~~त्लं~~ तर्पयामि | उखं तर्पयामि | अगस्त्यं तर्पयामि | कौण्ढिन्यं~~यं~~ तर्पयामि | पदकारं तर्पयामि | वृत्तिकारं तर्पयामि | सूत्रकारांस्तर्पयामि | सत्याषाढं~~ढ्ढं~~ तर्पयामि | प्रवचनकर्तृंस्तर्पयामि | आचा~~र्यां~~र्यांस्तर्पयामि | वानप्रस्थांस्तर्पयामि | ऋ~~षी~~षींस्तर्पयामि | ऊर्द्ध्वरेतस्तर्पयामि | एकपत्नीस्तर्पयामि |

இத்துடன் ஜீவபித்ருகர் நிறுத்தி – ஆசமனம் | மற்றவர்கள்

पितॄन् स्वधानमस्तर्पयामि | पितामहान् स्वधानमस्तर्पयामि | प्रपितामहान् स्वधानमस्तर्पयामि | मातॄस्स्वधानमस्तर्पयामि | पितामहीस्स्वधानमस्तर्पयामि | प्रपितामहीस्स्वधानमस्तर्पयामि | मातामहान् स्वधानमस्तर्पयामि | मातुः पितामहान् स्वधानमस्तर्पयामि | मातुः प्रपितामहान् स्वधानमस्तर्पयामि | मातामहीस्स्वधानमस्तर्पयामि | मातुः पितामहीस्स्वधानमस्तर्पयामि | मातुः प्रपितामहीस्स्वधानमस्तर्पयामि |ज्ञाताज्ञातपितॄन् स्वधानमस्तर्पयामि|

(*उपवीती*)

हँसहश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् || नृषद्वरसद्दृत सद्व्योम सदब्जा दृतसद्व्योमददब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् || *आचामेत्*||

**|| हिरण्यकेशिनां वेदोपाकरणप्रयोग: ||**

**श्रावणदिनम् –**

उपाकर्म तु कर्तव्यं श्रवणापक्षहस्तमे भे|
श्रावण्यां पौर्णमास्यां वा ततो भाद्रपपुदे पुनः |
आषाढ्यां वापि तत्कार्यं बोधायनमताश्रयात् |
हस्तस्य पौर्णमास्याश्चक्ष्च प्राधान्यं तु विकल्पितम् ||

**स्थलं –**

देवालये नदीतीरे शुचौ देशे सभास्थले |
उपविश्य यथाशास्त्रं श्रावणञ्च विनिर्दिशेत् ||

**ச்ராவண தினத்தன்று காலை**

**कामोऽकार्षीन्मन्युरकार्षीन्मन्त्रजपसंकल्पः**

*आचम्य* | शुक्लाम्बम्भर ++ शान्तये || *प्राणायामः* ||

ममोपात्त समस्त दुरितक्षयद्वारा परमेश्वराज्ञया परमेश्वरप्रीत्यर्थं –तैष्यांश्यां पौर्णमास्यां अध्यायोत्सर्जनाकरणप्रायश्चित्तार्थं कामोऽकार्षीन्मन्युरकार्षीन्महामन्त्रजपं करिश्ये || (*इथि संकल्प्य, यथाशक्ति प्राणानायम्य अष्टोत्तरशतं तज्जपः कार्यः* )

**महासंकल्पः**

अस्य श्री महापुरुषस्याऽनिवावार्यवीर्यस्याखिललोक सृष्टिश्टिकर्तुः परमेश्वरस्य नित्य निरुपम निरवधिकाप्रमेय महिम महित मायाशक्त्या भ्रियमाण महाजलौघ मध्ये परिभ्रमतां प्रिभ्रमतां क्रमाद्दशगुणोत्तरैरप्तेजोवाय्वाकाशाहं कारमहदव्यक्तात्मकसप्तावरणैः परिवेष्टितानां अनन्तकोटि ब्रह्माण्डानां

एकतमे अस्मिन्महति ब्रह्माण्डण्शमण्डले आदिशक्ति कूर्मानन्तोपरि भागप्रतिष्टितानां पाताळ महातल रसातल तलातल सुतल वितलातलाख्य सप्तलोकानामूर्ध्वभागे भुवर्लोक सुवर्लोक महोलोक जनोलोक तपोलोक सत्यलोकाख्यषड्लोकानां अधोभागे ऐरावत पुण्डरिक वामन कुमुदां जन पुष्पदन्त द्न्त सार्वभौम सुप्रतीकाख्य अष्टदिग्वेतण्डण्श शुण्डाद्ण्डोत्तंभिते, अयोध्या मधुतुरा माया काशी काञ्ची अवन्ती द्वारवती अशोकवती भोगवती सिद्धवती अमरावती तेजोवती संयमिनी रक्षोवती सिंधुमती प्रभृतिप्रभृती पुण्यपुरी विराजिते, इन्द्राग्नि यम निरृति निर्ऋती वरुण वायु कुबेर ईशानाख्य अष्टदिक्पालपालिते, अनलानिल प्रत्यूष प्रभास सोमाध्वर ध्रुवापाख्य अष्टवसुविराजिते, सूर्य चन्द्र अङ्गारक बुध बृहस्पति शुक्र शनैश्चश्चर राहु केत्वाख्य नवग्रहपरिपालिते, आवह निवह संवह अनुवह प्रवह उद्वह परिवहाख्य सप्त मरुत्संचार संजीवित जीव निकुरंबे, विन्ध्यारण्य दण्डकारण्य चंपकारण्य श्वेतारण्य नैमिशारण्य द्वैतारण्य गुहारण्य देवदारुवन इक्षुवन कदलिकावनाख्य दशारण्य परिमण्डिण्शिते, शिव शम्भु पिनाकि गिरिश हर स्थाणु भर्ग बैभैरव सदाशिव कपालि विश्वेश्वराख्य एकादश रुद्र विद्योदिते, मित्र अर्यम त्वष्टृ धातृ विवस्वत् विवरवत् अरुण भग अंशुमत् इन्द्र पर्जन्य विष्णु पूषाख्य द्वादश आदित्य प्रकाशिते मिण्डिपाल दंड भुसुण्ठि नाळीक मुसल चक्र लवित्रक्र कालरात्रि द्रुघण बाणस्थूण शक्ति तोमर परिघ पट्टद्दस मौष्टिष्टक कुन्द दशकण्टक प्रास पाश मुद्गर शतघ्नी सीर गदा गोशीर्ष मयूखी यापन पिनाकासि धेनुकास्तरेळा हस्तामुक्त वज्राख्य

द्वात्रिंशत् आयुध मण्डण्शल मण्डितदोर्दण्ड हरिश्चन्द्र नल पुरुकुत्स पुरूरवस् सगर कार्तवीर्याख्य ष्ट्षट् चक्रवर्ति श्रीराम जमदग्नि दिलीप अङ्ग ग्अग यामंबरीष शशिबिन्दु शिबि मांधातृ मरुत्त भरत ययाति पृथु भगीरथ रन्तिदेव सुहोत्राख्य षोढश महाराज पालिते, विशालाक्षी मीनाक्षी कामाक्षी सिंहिका शङ्करी कुब्जिका महालक्ष्मी महादेवी महहाकाळी पार्वती सुप्रभा भ्रमराम्बिका विन्ध्यवासिनी योगिनी हिमरूपिणी माणिक्यदेवी काद्रवेयी ऊपूर्णिकाख्य अष्टादश पीठदेवी समलङ्कृते, यम नियम आसन प्राणायाम प्रत्याहार ध्यान धारण समाधि अष्टाङ्गयोगनिष्ठागरिष्ठ वसिष्ठ वालखिल्य विश्वामित्र वाल्मीकि जमदग्नि च्यवन दुर्वास: कपिल मौद्गल्य कौण्डिण्शिन्य कश्यप गार्ग्य गौतम आङ्गिरस दक्ष पराशर जैमिनि पतञ्जञ्जलि कण्व बोधायन आश्वलायन कात्यायन द्राह्यायण वैशंपायन आपस्तंब जाबालि मार्कण्डेय माण्डव्य हिरण्यकेश सत्याषाढ भरद्वाज सनक सनन्दन सनत्कुमार सनत्सुजात अगस्त्य शौनकादि अनेक मुनिराजि विराजिते, मलय महेन्द्र सह्य शुक्तिमद्दक्षवद्विन्ध्य पारियात्राख्य सप्त कुलाचल वलयिते, ऋश्यमूक मतङ्ग किष्किन्ध माल्यवत् हिरण्यशृङ्गाख्य पञ्चमहानगसमधिष्ठिते, लवण इक्षु सुरा सर्पि: दधि क्षीर शुद्धोदकाख्य सप्त समुद्र संवृते, वेद वेदाङ्ग इतिहास आगम न्याय काव्य अकलङ्कार नाटक गान कवित्व कामशास्त्र द्यूत नैपुण्य देशभाषाज्ञान लिपिकर्म वाचक समस्तावधान स्वरशास्त्र शकुन सामुद्रिका रत्नपरीक्षा अश्वलक्षण गजलक्षण मल्लविद्या पाककर्म दोहन गन्धवाद धातुवाद खनिनीवाद रसवाद अग्निस्तम्भ जलस्तम्भ वायुस्तम्भ खड्ग्ड्गस्तम्भ

वर्याश्याकर्षण मोहन विद्वेषण उच्चाटन मारण कालवञ्चन वाणिज्य पाशुपाल्य कृषि आसवकर्म लावुक युद्धयुद्धफ़ मृगया रतिकौशल अदृश्यकरणी द्यूतकरणी चित्र लोह पाषाण मृद्दारुवेणु चर्माम्बरक्रिक्रिया चौर्य औषधसिद्धि मन्त्रसिद्धि स्वरवञ्चना दृष्टिवञ्चना अञ्जञ्चन जलप्लवन वाक्सिद्धि घुटिकासिद्धि पादुकासिद्धि इन्द्रजाल महेन्द्रजालाख्य चतुष्षष्टिविद्या निषद्यायमान निरवद्य विद्वज्जन विद्योतिते, अङ्ग वङ्ग कलिङ्ग काश्मीर काम्भोज कामरूप झैसौवीर सौराष्ट्र महाराष्ट्र नेपाल केरल सिंहल चोल पाञ्चाल कोसल कुन्तल ज्वाला साल्व मगध मालव मत्स्य वत्स मद्र मैङ्ग सिन्धु आन्ध्र गान्धार लाट वराट कर्णाटक द्रमिड पाण्ड्य पुलिङ्ग बर्बर विदर्भ केकय कुरु किरात दशार्ण कोङ्कण यवन शूरसेन घूर्जर विदेह चेदि भोज अवन्त्यादि ष्टपषट्पञ्चाशत् देश समलङ्कृते, भागीरथी भीमरथी सरस्वती गौतमी नर्मदा यमुना कृष्णवेणी वेणुका तुङ्गभद्रा चन्द्रभागा वरुणा मलापहा कावेरी कपिला कौण्डिनी कृतमाला विपाशा तापिनी पूर्णिमा ताम्रपर्णी वेगवती हेमवती वेत्रवती नेत्रवती विशोका कौशिकी गण्ड्कीण्डकी गोमुखी पिनाकिनी क्षीरनदी पुण्यदाद्यनेक महानदी विराजिते, वाराणसीसि चिदम्बर श्रीशैल अहोबल वेङ्कटाचल सेतु जम्बुकेश्वर कुम्भघोण हालास्य गजारण्य गोकर्ण अवर्तपुर अनन्तशयन अमरगिरि यादवगिरि करिगिरि ककुद्गिरि श्वेतगिरि निनीलगिरि गोवर्धनगिरि गया प्रयाग जप्येश्वरादि अनेक पुण्यक्षेत्र संयुते, ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही इन्द्राणी चामुण्डाख्य सप्त मातृका विराजिते, सावित्री सत्यवती दमयंती मदयन्ती लोपामुद्रा सुकन्या केशिनी सुशीला अनसूया अरुन्धती प्रभृति महापतिव्रता सन्दोह समलङ्कृते, रम्य रमणक द्वारका सिंहल कैवल्य मलयाश्व भद्रकेतु गोबिलावन्त्य पुष्कर ऋषभ रैवत निम्लोचनीयाम्य पारावार लङ्का सौर कृतमालाख्य अष्टादश उपद्वीप विराजिते, पञ्चशत्कोटि विस्तीर्णेर्ण अस्मिन् भूमण्डले सुन्दरतर चन्दन मन्दार कोविदार कुटज वट पाटल करवीर कुरण्टक कण्टकी पिप्पल कर्पूर कदली खर्जूर नारिकेल रसाल तमाल ताळ हिन्दोळ कृतमाल सरल वकुल वञ्जुञ्चुल पुन्नाग जम्मूम्बू जम्मीम्बीर निंब कदम्ब सारङ्ग लवङ्ग रुद्राक्ष इक्षु कपित्थ अश्वत्थ बिल्व भल्लातक सल्लकी बदरी लिकुच चम्पक केतक कुद्दाल्ल बन्धूक सिन्धुवार पिचुमन्द उदुम्बर पलाश पारिजाताद्यने कानोकहनिवह निरन्तर मनोहर नन्दनवन न्वन व्रीडावह क्रीडावन विहरद्देर्ईवदानव गन्धर्व किंनर किंपुरुष सिद्ध साद्ध्य विद्याधर यक्ष राक्षसादि दिव्यजननिवास समलङ्कृत शीताचल बिन्दु मुकुन्द मन्दर ककिलिन्द वैकङ्कत मणिशैल चक्रशैल महम कपिल महाशैल पञ्चशैल गजशैल भद्रशैल वसुधार वसुमार कुमार कालञ्जञ्चर पाण्डर पुष्कर वैदूर्य पारियात्र पसहस्रशिखर मयूर ताम्राभ शिखिवास सुरहंस नाग कुमुद मुमकुट त्रिकूट शङ्खङ्खकूट महामेघ सुमेघ सुगन्ध गन्धमादन सुपार्श्व सुषेण सुपक्ष कनकविरजाद्रि केसर शिखरि विसर भासुर मेरुधराधरस्य दक्षिण दिग्भागे, जम्बू प्लक्ष कुश क्रौञ्च शाक शाल्मलि पुष्कराख्य सप्तद्वीपानां मध्ये, जम्बूद्वीपे, भारत किंपुरुष हरीलावृर भद्राश्व केतुमाल हिरण्यकका रमणक कुरुवर्षाख्य नववर्षाणां मध्ये भारतवर्षे, इन्द्र कशेरु ताम्र गभभास्ति पुन्नाग

गन्धर्व सौम्य वरुण भरताख्य नव खण्डानां मध्ये भरतखण्डे, निरतिशय जनि निरूढ निखिलजन कलुष निकर तिमिर खर किरण सदृश कवेरकन्यका कमनीय कृपीपिटपूर परिरिङ्खदभङ्गुर मङ्गलतर रुतुङ्गतरङ्गग्ग परंपरा परिगत पवमान परिस्पन्द परमपावन प्रचुरतर निखिलसस्य समृद्धि समेधमान कर्णाटजन पदाधिष्ठान सह्याभिधावान गिरिवरिष्ठस्य उपरिभागे, दण्डकारण्ये अस्मिन् भास्करक्षेत्रे शङ्ख चक्र गदा शार्ङ्ग नंदकाख्य पञ्च महायुधधरस्य, दिव्यरत्न खचित किरीट हार केयूर नूपुर मकर मुकुण्डल प्रमुख प्रस्फुरत् अप्राकृत भूषणावली विभूषितस्य, चतुरानन पुरन्दर प्रमुख सकल सुरासुर विसर शिरस्तटी विराजमान मकुटतट घटित दिव्य मरीचि परंपरा नीराजितोपान्त चरणांभोरुहस्य, निखिल लोकानुजिघृक्षास्वीकृत मत्स्य कूर्म वराह नरसिंह वामन भार्गवराम श्रीराम भलराम कृण बौद्ध कल्क्यादि अनेक अवतार वैभवस्य, प्रह्लाद नारद पराशर पुण्ड्रीण्डरीक व्यासओवास अंबरीष शुक शौनक भीष्म दाल्भ्य रुक्माङ्गद अर्जुन विभीभिषण वसिष्ठ बलि हनुमदाख्य षोढश महाभागवत विमलतर हृदयान्तराल निरन्तर निरर्गल दोला विहार समासक्तस्य, गर्भस्थानेककोटि ब्रह्माण्ड मण्शलण्डस्य, भगवतो लक्ष्मीपते: नारायणस्य नाभीसरोजमध्य समुद्रद्भूतस्य, चराचरात्मत्मिक निखिल प्रपञ्च निर्माण कपट नाटक सूत्रधारस्य शारद नीरद पारद सच्छाय वाग्देवता निरर्गल निरन्तर विहरण विलास भवनायमान वदनारविन्दस्य, सरसतर सारस निकर भासुर मानस सरोवर विहरण लालस मानस राजहंस वाहनस्य, श्रीपरमेश्वराज्ञया प्रवर्तमानस्य आद्य ब्रह्मण: प्रथम परार्धे पञ्चाशद्वस्सरेषु अतीतेषु, द्वीतीय परार्धे प्रथम वर्षे प्रथम मासे, प्रथम पक्षे प्रथमदिसिवसे अहनि द्वितीये यामे तृतीये मुहूर्ते प्रथम प्राणायाम समये पार्थिव कूर्म प्रलयानन्त श्वेतवराह ब्रब्राह्म सावित्राख्य सप्त कल्पानां मध्ये श्वेतरवराह कल्पे, स्वायंभुव स्वारोचिष उत्तम तामस रैवत चाक्षुष वैवस्वत सूर्य सावर्णि धर्मसावर्णि दक्षसावर्णि रुद्रसावर्णि ब्रह्मसावर्णि इन्द्रन्स्रसावर्णि देवसावर्ण्याख्य चतुर्दश मन्वन्तराण मध्ये, सप्तमे वैवस्वतमन्वन्तरे, सप्तविंशति महायुगेषु अतीतेषु अष्टाविंशति तमे महायुगे, कृत त्रेता द्वापर कलियुगाख्य चतुर्युगाणां मद्ये अष्टाविंशति सहस्रोत्तर सप्तदशलक्षाब्दे कृतयुगे, षण्णवति सहस्रोत्तर द्वादश लक्षाब्दे त्रेतायुगे, चतुष्षष्टि महस्रोत्तर आअष्टलक्षाब्दे द्वापरयुगे च् समतीते, द्वात्रिंशत्सहस्रास्त्रान्वित चतुर्लक्षाब्दे वर्तमाने कलियुगे प्रथमभागे, युधिष्ठिष्ठर विक्रम शालिवाहन विजयाभिनन्दन नागार्जुन कलिभूपाख्य शकपुरुषमध्यपरिगणित शालीवाहन शके, बौद्धावतारे, ब्राह्म दैव पित्र प्राजापत्य बार्हस्पत्य सौर चान्द्रब्द्र सावन नाक्षत्रमानाख्य नवमान मध्य परिगणितै: सौर चान्द्रमस सावन नाक्षत्रमानै: अन्विते, प्रभवादीनां षष्ठ्या: संवत्सराणां मध्ये --------- नामसंवत्सरे ---------- अयने ----------- ऋतौ ---------- मासे शुक्लपक्षे ---------- वासरयुक्तायां ------------- नानक्षत्रयुक्तायां अस्यां पूर्णिमायां शुभतिथौ अनाद्यविद्या वासनया प्रवर्तमाने अस्मिन् महति संसारचक्रे विचित्राभि: कर्मस्मगतिथि: विचित्रासु योनिषु पुन: पुन: अनेकधा जनित्वा केनापि पुण्यकर्मविशेषेण इदानीनिन्ततमानुष्ये द्विजन्मविशेषं प्राप्तवत: मम सृष्टिकालमारभ्य एतत्कालपर्यन्तं बाल्ये वयसि

कौमारे यौवने बार्धके च जाग्रत्स्वप्न सुषुप्ति अवस्थासु मनोवाक्काकाय कर्मेन्द्रिय ज्ञानेन्द्रिय व्यापारैः काम क्रोध लोभ मोह मद मात्सर्यादिभिः प्रकाशकृत महापातक चतुष्टय व्यतिरिक्तात्कानां रहस्यकृत महापातकानां, ब्रह्महत्या सुरापान स्वर्णस्तेय गुरुतल्पगमनानां, महापातकातिदिष्टातिपातकानां, संसर्गि भाव आज्ञापयितृत्व अनुग्राग्रहकत्व प्रयोजकत्व निमित्त उपदेष्टत्व अनुमन्तृत्व प्रोत्साहकत्वादीनां उपपातकानां, सोमयागस्थ क्षत्रिय वैश्य वध अविज्ञातगर्भवध ऋतुमतीवध अत्रेयगोत्रस्त्रीवध दीक्षितस्त्रीवधादीनां ब्रह्महत्यासमानानां, गुर्वाक्षेव सुहृद्धन अधीत नाशनादीनां सुरापानसमानानां, उत्कर्षापकर्ष अनृतभाषण अभक्ष्यभक्षण पुष्पवतीमुखास्वादनादीतां स्वर्णस्तेयसमानानां, रक्तात्काश्वहरण अमर्त्यस्त्रीहरण निक्षेपद्रव्यहरणादीनां गुरुतल्पकसमानानां, सखिपत्नी कुमारी सगोत्रजा गमन अन्त्यजागमन सयोनिगमन सूतस्त्रीस्त्री गमनादीनां उपपातकानां, सामान्यगोवध व्रात्यत्व ब्राह्मण व्यतिरिक्तरीक्त साधारण द्रव्यस्तेय ऋणपातक अनपाकरण अनाहिताग्नित्व पुण्यविक्रय भृतकाद्ध्ययन भृतकाद्ध्यापन परदारपरत्व वार्द्धुष्यर्द्धूष्य लवणविक्रय क्षत्रिय विट् च्छूद्रद स्त्री वध निंदिताधर्थोपजीवन नान्तिक्य व्रतलोप सुतताविक्रय धान्यकुप्य पशुस्तेय अयाज्ययाजन पितृ मातृ सुतत्याग तटाकाऽऽरामविक्रय कन्यादूषणण्ण परिवित्तिकयाजन परिवित्तिकन्या प्रप्तदान कौटिल्यय आत्मार्थक्रियारंभ मद्यपस्त्रीगमन तदाश्रमवास परा न्नपरिपुष्टत्व असच्छास्त्राभिगमन भार्याविक्रयादीनांण्णां संकरीकरणानां, अजवध मीनाहिमहिषी वधादीनां मलिनीकरणानां क्रिमि कीट वयोवध मद्यानुगतभोजन फल पुष्पचौर्यादीनां अपात्रीकरणानां निंदितधनादान कुत्सितजीवन असम्भाष्य भाषणादीनां जातिभ्रंशकराणां मद्याघ्राण ब्राह्मणपीडन जैह्म्यपुंमैथुनादीनां प्रकीर्णकानां उत्तमकर्मपरित्याग निन्दितकर्मनिषेवण इन्द्रियानिग्रह परमर्मभेदन श्रौतस्मार्तनित्यकर्मानुष्ठानलोप ग्रहखण्डन अकालभोजन क्लीब व्रात्य वार्द्धुषिक शूद्र कुष्ठि यति पति गणक गणिकागणान्नग्रगण अष्टमी ष्तमी चतुर्दर्सशी दिवाभोजन द्वादशी दशमी पूर्वकाल भानुवाररात्र्यन्नत्र्यान्न एकाखादश्यन्न वामहस्तान्न वटादि निषिद्धपातत्रान्न भोजन शूद्रपक्वतंडुल चंडालस्फाटितान्न भोजन ग्रामयाजकान्न बंधुमेलन उच्छिष्टान्न पर्युषितान्न श्ववराहादि अस्पृश्यजन्तुस्पृष्टभांड पक्वान्न मक्षिकाकेशास्थिस्थ दूषितान्न कुंडान्न गोलकान्न उच्छिष्टान्न चिकित्रकान्न जैनान्न तुरुष्कान्न श्कान्न कारागृहवासान्न अपाङ्क्तेय पङ्क्तेय पङ्क्ति भोजन खरोष्ट्र ष्ट्रयुक्तयानारोहण साक्षात् खरारोहण वृक्षारोहण निषिद्ध पक्षि मृग मत्स्य मांस भक्षण विधिरहितपशु मांसभक्षण उद्धृ द्धतसार पिण्याक भक्षण वृधा कृसर यावक पायसापूप हस्तदत्त शाक भक्षण फलशाक भक्षण छर्दितर्दुत रेतो विण्मूत्र भक्षण स्वायंयभुव वैदिक व्यतिरिक्त चंडेशेशाधिकृत शिवनिर्माल्य भक्षण कलत्र शूद्रोच्छिष्ट भक्षण आरालि पक्व भक्षण दिवास्वस्त्रीसङ्गमन म्लेच्छ रथकार व्वजकार लोहकार स्त्रीस्त्रीगमन विधवा दासीशी गर्भिणी प्रव्रजितपतिका स्त्रीगमन ज्ञाग्रामान्त्यजागमन अन्यावरुद्ध स्त्रीगमन तिर्यज्योग्योनिगमन गृहस्थ

कपिलादिगोराहित्य पितृ मात्रादि स्वकर्तृक नित्यनैमित्तिक श्राद्ध अन्न आम हिरण्यादि श्रद्धराहित्य धौतवस्त्रस्त्र परिवर्तन शौचाचमन सन्ध्यावन्दनवेला नियमराहित्य नग्नस्नानपान अशुद्धजलस्नानपान सूर्योदयास्तमयस्वाप दिवास्वाप अकालस्वाप गुरुविषय हुंकार करण पादघात ब्राह्मणतिरस्कार आर्तदंडोद्यमन सौराष्ट्रादि दुर्देशगमन असहायमार्गगमन परताडन भर्त्सन जीर्ण मलिन अमेद्ध्याद्यस्पृश्यस्पृष्टाऽशुद्ध वस्त्रधारण अनपराध भार्या दासी दास भृत्य ताडन भर्त्सन एकपङ्क्तिक्त्क उपविष्ठ विषमप्रदान उदकाहरण मार्गहन्तृत्व वकन्या विघ्नकरण विवाहयोग्यज्य वरदूषण गुरुब्राह्मणदूषण सद्वृत्तिसद्वऋत्तिपरित्यागपूर्वक द्रव्यार्जन स्वयं कृषि जीवन चण्ढालकारित कृषि फलित धान्योपजीवन अन्य कारित प्रपाजलपान खोखरोष्ट्रविदूद्रूवराहादि क्षीरपान दिवावशिष्ट भक्षण अभ्यंब्यंगाऽवशिष्ट तैलपान निषिद्धकाल तैसाभ्यंब्यंग दुर्मरण प्रयुक्त शस्त्रधारण परस्त्री साभिलाष निरीक्षण क्षत्रिय वैश्य शूद्रादि अभिवादन परोपकार तृण जुल्म गुल्म नाशन मन्त्र तन्त्र कर्मलोप तिष्ठन्मूत्रपुरीषोत्सर्जन गोमांस गन्धाघ्राण चण्डालस्पर्शनदर्शन संभाषण तुरुष्कश्क द्रव्योपजीवन तुरुष्कश्क ग्रहनिवासानां सूर्यग्रहणादि पुण्यकालेषु कुरुक्षेत्रादिषु प्रतिग्रहाणां महिषी मेषी कृष्णाजिन उभयतोमुखी तुलापुरुष कालपुरुष गोप्रतिग्रह स्वाद्याद्ध्यूम्याय राहितत्व रहितस्वाद्धूयायाद्येतृत्व नित्य नैमित्तिकस्त्यक नानात्तिक नानाविध निषिद्धकालेषु स्वाद्धयाय शास्त्राद्येतृत्व व्यवहार पक्षपात ब्राह्मणक्षेत्र तदन्यक्षेत्र ग्रहसीमाकुल्या नदी तटाक कूपाद्यपहरण, मनुष्य पक्षि बन्धन ब्रह्मचारीन परिव्राट् च्छास्त्र वेद निष्ठाकरण परोपतापकरण अनर्हासनप्रदान वाक्पारुष्य दण्डपारुष्य अकालदन्तधावन अकालक्षौर मित्रद्रोह स्वामिद्रोह परमेश्वरादि स्मरणराहित्यादीन, चण्डाल शूद्र स्त्री सम्भाषण यथेच्छगमन नदीतरण गोस्पर्शन देवालय आरामादि गमन कूटकादिनिर्माण तृणच्छेदन शष्पहरणादीनां देवालयागारदहन विषशस्त्रादि बलात्कत्कारण बालपीडन गर्भध्वंसन विहंगाण्डप्रभेदन ग्रहणकाल पर्वकाल संभोगादीनां एकपुत्र पक्षपात गुणवत्पुत्र निन्दा पूर्वक कन्या सम्मान-नादीनां बहुपुत्राढ्य सपत्नी असूयाकरण असूयया पङ्क्तित्क मेदकरण वृधा शुष्कान्न पर्युषितान्नदान बालनिष्ठुर भाषण अन्यस्त्री रति भङ्ग करणादीनां सर्पस्तम्भन मारण उच्चाटन शुकशारिका मार्जारादि अस्पृश्य जनिपीढादीनां अस्नान भोजन पर्वकाल रात्रित्री भोजन पर्युषितान्नभोजन अनवरत ताम्बूलचर्वण प्रपाजलपान मनिनवस्त्रधारणादीनां, विधवानां केशरक्षण पुण्यतीर्थानिषेवण सुगन्धधारित्व कस्तूर्यादि अनुलोपनादि पुष्पधारण निनीलचित्र वस्त्रधारण कांस्यपात्रभोजन एकभुक्तत्कराहित्य एकादशी शिवरात्र्यादि पुण्यादीन पुण्यदिन उपवासराहित्य देवतास्मरणराहित्य सच्छास्त्र कथा श्रवण पुराणश्रवणराहित्य उत्तिष्ठमान जलपान भर्तृदूषण पापकर्मनिरीक्षण नानाविध विद्धयुक्त कर्माकरणादीनां एवं नवानां नवविधानां बहूनां बहुविधानां सर्वेषां पापानां सद्यः उअपनोदनार्थं भास्कर क्षेत्रेरे देव ब्राह्मण सन्निधौ -------- नदी तीरे श्रावण्यां पौर्णमास्यां अद्धाय्योपाकर्म करिष्ये ॥ तदङ्गं नदीस्नानमहं

करिआश्येष्ये ॥ (*इतिथि सङ्कल्प्य स्नात्वा धौत शुक्लांबरावृतः यज्ञोपवीतं धारयेत्* )

*(यज्ञोपवीतधारणे मन्त्रः )* आचम्य । शुक्लाम्बर ----------- शान्तये ॥ ममोपात्त ----------- प्रीत्यर्थं श्रौतस्मार्त्त विहित नित्य कर्मानुष्ठान योग्यज्यतासिद्ध्यर्थं ब्रह्मतेजोभिवृद्ध्यर्थं यज्ञोपवीतधारणं करिष्ये । (*इथि संकल्प्य* )

ॐ अस्यश्री यज्ञोपवीतधारण महामन्त्रस्य परब्रह्म ऋषिः त्रिष्टुप् छन्दः परमात्मा देवता । यज्ञोपवीतधारणे विनियोगः ।

यज्ञोपवीतं परमं पवित्रं प्रजापतेः यत्सहजं पुरस्तात् ।
आयुष्यमग्रयं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥
*यज्ञोपवीतं घृत्वा आचम्य* । यज्ञस्य उपवीतेन उपव्ययामिव्यामि । दीर्घायुत्वाय सुप्रजास्त्वाय सुवीर्याय । यशसे ब्रह्मणे ब्रह्मवर्चसायत्वा । सर्वेषां वेदानांदेवानां आधिपत्याय ॥ (*इति – पुनराचामेत्*)

*जीर्णयज्ञोपवीतं विसृजेत्* ।

उपवीतं भिन्नतन्तुं जीर्णं कश्मलदूषितम् । विसृजामि न् हि ब्रह्म वर्चो दीर्घायुरस्तु मे ॥ (*इति प्राक्तनं उपवीतं विसृजेत्*)

*आचामेत्* ॥

(*अत्र ब्रह्मचारिणां विशेषः*) या दुरितात् परिबाधमानान्नां शर्मवरूथे पुनती नः आगात् प्राणापानाभ्यांब्भ्यां बलं आवहंती स्वसा देवानां सुभगा मेखलेयम् (*इति मेखलाम्*)

मित्रस्य चक्षुः धरुणं धरीयः तेजो यशस्वि स्थविरं समिद्धं अनाहनस्यं वसनं जरिष्णुंष्णु परीदं वाजि अजिनं दधेऽहम्म (*इति अजिनम्*)

कश्चित् ल्श्चित् आयुः प्रदरां कृणोतु । आअग्निर्मे पुष्टिं प्रतरां दधातु । इन्द्रो मरुद्भिरिह मे दधातु । आदित्योमे वसुभिरादधातुधात्तु ॥ (*इति दण्डं च बिभृयात्*)

(*ब्रह्म यज्ञः रेफ़ेर् पेज् ....* )

**श्रावणहोमः** (*शुचौ समे देशे उल्लिख्य भूर्भुवस्सुवरों इतिथि आअग्निं प्रतिष्ठाप्य परिस्तीर्य प्रोक्षणीसंस्कारं कृत्वा प्रणीताप्रणयनानन्तरं ब्रह्माणं वरयेत्*। *अथ अग्नेः उत्तरतः तंडुलोपरि प्रतिष्ठिते अलङ्कृते कुम्भे श्रि श्री वेदव्यासं आवाह्य आसनादि षोढशोपचारान्तं कुर्यात्* । *ततः आज्यसंस्कारादि मुखान्तं कृत्वा*)

**प्रधानहोमः** प्रजापतये काण्डऋषये स्वाहा । प्रजापतये काण्डऋषय इदं नमम ॥ सोमाय काण्डऋषये स्वाहा । सोमाय काण्डऋषय इदं न मम ॥ अग्नये काण्डऋषये स्वाहा । अग्नये काण्डऋषय इदं न मम ॥ विश्वेभ्यो देवेभ्यः काण्डऋषभ्यः स्वाहा । विश्वेभ्यो देवेभ्यः काण्डऋषिषभ्यः इदं न मम॥ स्वयंभवे

काण्डऋषये स्वाहा | स्वयभुवे काण्डऋषय इदं न मम || सावित्र्यै स्वाहा | सावित्र्या इदं न मम || ऋग्वेदाय स्वाहा | ऋग्वेदाय इदं न मम || यजुर्वेदाय स्वाहा | यजुर्वेदाय इदं न मम || सामवेदाय स्वाहा | सामवेदाय इदं न मम || अधर्ववेदाय स्वाहा | ~~अध~~अथर्ववेदाय इदं न मम || सदसस्पतिं अद्भुतं प्रियं इन्द्रस्य काम्यम् सनिं मेधा~~वा~~मयासिषं स्वाहा | सदसस्पतय इदं न मम ||

**अध्ययनारंभ:**

गणानांत्वा ++ ||

इषे~~शे~~ त्वा उर्जे त्वा वायवस्स्थ उपायवस्स्थ देवो व: सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे~~ने~~ आप्यायध्वं अघ्निया: ~~म्रिया:~~ देवभागं ऊर्जस्वती: पयस्वती: प्रजावती: अनमीवा: अयक्ष्मा: माव: स्तेन ईशत माऽधशंस: रुद्रस्य हेति: परिव: वृणक्तु~~ल्कु~~ ध्रुवा अस्मिन् गोपतौ स्यात बह्वी: यजमानस्य पशून् पाहि ||

~~यज्स्य~~ यज्ञस्य घो~~-~~धोषदसि प्रत्युष्टं रक्ष: प्रत्युष्टा: अरातय: प्रेयमगात् धिषणा बर्हिरच्छ मनुना कृता स्वधया वितष्टा त आवहंति कवय: पुरस्तात् देवध्य: जुष्टं इह ~~बा~~बर्हि: आसदे देवानां परिषूतमसि वर्षवृद्धमसि देव~~बा~~बर्हि: मा त्वा ऽन्वक् मा तिर्यक् पर्वते राद्ध्यासं आच्छेत्ता ते मारिषं देवबर्हि: शतवल्शं विशेह सहस्रवल्शा: || २ || विवयं रुहेम~~न~~ पृथिव्या: संपृच: पाहि सुसंभृता त्वा संभरामि अदित्यै रास्नासि इन्द्राण्यै सन्नहनं पूषा ते ग्रंधिं गृथ्नातु स ते माऽऽस्थात् ~~-स्थात्~~ इन्द्रस्य त्वा बाहुभ्यां उद्यच्छे बृहस्पते: मूर्ध्ना हरामि उर्वन्तरिक्षं अन्विहि ~~अध्विहि~~ देवंगममसि || ३ ||

शुन्धध्वं दैव्याय कर्मणे देवयज्यायै मातरिश्वन: ~~रिक्ष्वन:~~ घर्मोसि पृथिव्यसि~~व्यासि~~ विश्वधाया असि परमेण धाम्ना दृंहस्व ~~मूं~~ माह्वा: वसुनां पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारं हुतस्तोक: हुतोद्रप्स: अग्नये बृहते नाकाय वाहा द्यावापृथिवीभ्यां सा विश्वायु: सा विश्वव्यचा: ~~जा:~~ सा विश्वकर्मा संपृच्य~~ज्य~~ध्वं ऋतावरी: ऊ र्मिणी: मधुमत्तमा: मन्द्रा: धनस्य सातये सोमेन त्वा आतनच्मि इन्द्राय विष्णो हव्यं रक्षस्व || ४ ||

कर्मणेव वां देवेभ्य: शकेयं वेषाय त्वा प्रत्युष्टग्ं रक्ष: प्रत्युष्टा: अरातय: धूरसिन् धूर्व धूर्वन्तं धूर्व~~ब~~ तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वाम: ~~ल:~~ त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं देवहूतमं ~~अह~~अह्रुतमसि हविर्द्धानं दृंहस्व मा ह्वा: मित्रस्य त्वा चक्षुषा प्रेक्षे मा भे: मा संविक्था: || ५ || मात्वा हिंसिषं उरु वाताय देवस्य वा सवितु: प्रसवे ~~अक्षि~~अश्विनो: बाहुभ्यां पूष्णो हस्ताभ्यां इदं देवानां इदमुनस्सह स्फात्यै त्वा नाऽरात्यै सुवरभि~~रिभि~~ विख्येषं ~~वक्षौ~~वश्वौनरं ज्यौति: दृंहन्तां दुर्या: द्यावापृथिव्यो: उर्वन्तरिक्षं अन्विहि~~न्वहि~~ अदित्यास्त्वा उपस्थे सादयामि अग्ने हव्यं रक्षस्व || ६ || हरि: ओम् ||

ब्रह्म संधत्तं तन्मे जिन्वतम् | क्षत्रं सन्धत्तं तन्मे जिन्वतम् | इषं सन्धत्तं तांमे जिन्वतम् | ऊर्जं सन्धत्तं ताम्मे जिन्वतम् | रयिं सन्धत्तं ताम्मे जिन्वतम् | पुष्टिं सन्धत्तं तांमे जिन्वतम् | प्रजां सन्धत्तं ताम्मे जिन्वतम् | पशून् सन्धत्तं तान्मे

जिन्वतम् | स्तुतोऽसि जनधाः | देवास्त्वा शुक्रपाः प्रणयन्तु | सुवीराः प्रजाः प्रजनयन् परीहि || हरिः ओम् ||

भद्रं कर्णेभिः पर्णेभिः शृणुयाम देवाः | भद्रं पश्येमाक्षभिर्यजत्राः | स्थिरैरङ्गैः तुष्टुवांसस्तनूभिः | व्यशेम देवहितं यदायुः | स्वस्ति न इन्द्रः वृद्धश्रवाः | स्वस्ति नः पूषा विश्ववेदाः | स्वस्ति नस्तार्क्ष्यः अरिष्टनेमिः स्वस्ति नः बृहस्पह्मपतिः दधातु | आपमापामपस्सर्वाः अस्मादस्मादितोऽमुतः | अग्निः वायुश्चश्च सूर्यश्चश्च || हरिः ओम् ||

संज्ञानं विज्ञानं प्रज्ञानं जानत् अभिजानत् | सङ्कल्पमानं प्रकल्पमानं उपकल्पमानं उपक्लप्तंक्लृप्तम् | श्रेयोवसीयः आयत्संभूतं भूतम् | चित्रः केतुः प्रभानाभान् संभान् | ज्योतिष्मान् तेजस्वान् आतपन् तपन् अभितपन् | रोचनः रोचमानःनाः शोभनः शोभमानः कल्याणः | दर्शा द्रष्टा दर्शता विश्वरूपा सुदर्शना | आप्यायमाना प्यायमाना ऽऽप्याया सूनृतेरा | आपूर्यमाणा पूर्यर्यमाणा पूरयन्ती पूर्णा पौर्णमासी | दाता प्रदाताऽऽनन्दो मोदः प्रमोदः | आवेशयन् निवेशयन् संवेशनस्सगं शान्तश्शान्तः || हरिः ओम् ||

अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् | होतारं रत्नधातमम् || हरिः ओम् || अग्न आयाहि वीतये गृणानो हव्यदातये | निहोता सत्सि बररंहिषि | हरिः ओम् ||

शन्नो देवीरभिष्टये आपो भवन्तु पीतये | शंयोरभिस्रवन्तु नः | हरिः ओम् || यज्ञं व्याख्यास्यामः स त्रिभिर्वेदैः विधीयते ऋग्वेदेन यजुर्वेदेन सामवेदेनेति सर्वैरग्निष्टोमः || हरिः ओम् ||

प्रातरग्निहोत्रं हुत्वा अनुगमयित्वा आग्निहोत्रिकमपोदूह्य वोदित आदित्ये ज्ञागार्हपत्यादाहवनीयमुद्धृत्य ममाग्ने वर्च इत्यन्वादधाति || हरिः ओम् ||

अथअथातस्सामयाचारिकान् धर्मान् व्याख्यास्यामः धर्मज्ञसमयः प्रमाणं वेदाश्च | हरिः ओम् ||

उपनयनं व्याख्यास्यामः || सप्तवर्षं ब्राह्मणमुपनयत्येकादशवर्षं राजन्यं द्वादशवर्षं वैश्यम् | हरिः ओम् ||

अथ वर्णसमाम्नायः | अथ नवादितः समानाक्षराणि द्वे द्वे सवर्णे ह्रस्वदीर्घे | न प्लुत पूर्वं षोढशादितः स्वराः | हरिः ओम् ||

अ इ उ ण् – ऋळक् – ए ओ ङ् – ऐ औ च् – ह य व र ट् – लण् – ञ्ज म ङ ङ् ण न म् – झ भ ञ् – घ ढ ध ष् - ज ब ग ड द श् – ख फ छ ठ थ – च ट त व् – क प य् – श ष स र् – ह ल् इथि माहेश्वराणि सूत्राणि अ अणदिसंज्ज्ञार्थानि || वृद्धिरादैच् अदेङ्गुनःनाः | हरिः ओम् || सिद्धे शब्दार्थसंबंधे || हरिः ओम् || अथ शब्दानुशासनम् || हरिः ओम् || धी श्री स्त्रीं | व रा सा य् | का गु हा र् | व सु धा स् | सा ते क्वत् | कदा स ज् | किं व दढ भ्

| न ह स न् | गृ ल् | गन्ते | हरिः ओम् ॥ समाम्नाभ्नायस्समाम्नाभ्नातः स व्याख्यातव्यः तमिभिमं समाम्नाभ्नायं निघण्टव इत्याचक्षते ॥ हरिः ओम् ॥

हरिः ओम् ॥गीर्णश्श्रेयः धेनवश्श्रीः रुद्रस्तु नम्यः भवो हि याज्यः धन्येयं नारी धनवान् पुत्रः ॥ हरिः ओम् ॥ आसीदिदं तमोभूतमप्रज्ज्ञातमनक्षरं अप्रतर्क्य मनिर्देश्यं प्रसुप्तमिव सर्वतः ॥ हरिः ओम् ॥

हरिः ओम् | आद्यं पुरुषं ईशानं पुरुहूतं पुरुष्टुतम् | हरिः ओम् ॥ ऐश्वरं परमं तत्त्वं आदिमध्यान्तवर्जितम् | हरिः ओम् ॥ विष्णोस्सकाशात् उद्भूतं जगत् तत्रैव च स्थितम् | हरिः ओम् ॥ अथातो धर्मजिज्ज्ञासा ॥ हरिः ओम् ॥ अथातो ब्रह्मजिज्ञासा हरिः ओम् ॥

*(जयादिइ प्रभृति ब्रह्मोद्वासनान्तं कृत्वा)*

(*वेदव्यासं यथास्थानं प्रतिष्ठाप्य तस्प्रसादं ब्राह्मणाशिषं च गृहीत्वा गृहं यायात्*) ॥

*(परेद्युः गायत्रीजपसङ्कल्पः)*

*पवित्रपाणिः दर्भेष्वासीनः दर्भान्धारयमाणः (देशकालावनुकीर्त्य)* अपवित्रः ++ परमेश्वरप्रीत्यर्थं मिथ्याध्याधीत प्रायश्चित्तार्थं संवत्सर दोषवदपतनीयप्रायश्चित्तार्थंथं अष्टोत्तरसहस्रसङ्ख्यागायत्रीमहामन्त्रजपं करिष्ये ॥

इति सङ्कल्प्य यथाशक्ति कृतप्राणानायामः जपेत् – जपानन्तरं उपस्थाय आचामेत् ॥

॥ ओम् तत्सत् ॥

॥ **अमातर्पणम्** ॥

आचम्य ॥ पवित्रपाणिः ॥

शुक्लांबर ++ शान्तये ॥ ओं भूः सुवरोम् ॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोपिवा | यस्स्मरेत् यस्मरेत् ++ पुण्यतिथौ (*प्राचीनावीति*) ---------- गोत्राणां वसुरुद्रादित्यस्वरूपाणां अस्मत् पितृ पितामह प्रपितामहानां मातृ पितामही प्रपितामहीनां ----------- गोत्राणांनां सपत्नीक मातामह मातुः पितामह मातुः प्रपितामहानां उभयवंशपितृणां अक्षयतृप्त्यर्थंप्यर्थं अमावास्यापुण्यकाले वर्गद्वय पितॄन् उद्दिदिश्य दर्शश्राद्धं हिरण्यरूपेण अद्य करिष्ये ॥ (*उपवीतीति*) अपपौउपस्पृश्य | (*प्राचीनावीतीति*) अमावास्यापुण्यकाले अस्मिन् मया क्रियमाणे हिरण्यरूप दर्शश्राद्धे वसुरुद्रादित्यस्वरूपाणां अस्मत् वर्गद्वयपितॄणां इदमासनम् | सकलाराधनैः स्वर्चितम् ॥ हिरण्यगर्भ गर्भस्थं हेम बीजं विभावसोः | अनन्तपुण्यफलदं अतश्शान्तिं प्रयच्छ मे ॥ इदं आग्नेयं हिरण्यं -------- गोत्राणां पितृपितामह प्रपितामहानां मातृ पितामही प्रपितामहीनां ----------- गोत्राणांनां सपत्नीक मातामह मातुः पितामह मातुः प्रपितामहानां अक्षयतृप्त्यर्थंप्यर्थं अस्मिन् मया

क्रियमाणे हिरण्यरूप दर्शश्राद्धे वर्गद्वयपितृ णां अक्षयतृप्त्यर्थंप्यर्थं तुभ्यप्यमहं संप्रददे ‖ (*उपवीतीति*) देवताभ्य: पितृभ्यश्च महायोगिभ्य एव च | नमस्स्वधायै स्वाहायै नित्यमेव नमो नम: ‖ (*प्राचीननावीतीति*) वर्गद्वय पितृभ्यो नम: ‖ (उपवीतीउप्वीति) नमस्कार: देवताभ्य: ++ नमो नम: ‖

(*प्राचीनावीतीति*) अनेन मया कृतेन हिरण्य रूप दर्श श्राद्धेन वर्गद्वय पितर: प्रीयन्ताम् ‖ (*उपवीतीति*)

**तिल तर्पणम्** ‖ अद्य पूर्वोक्त एवङ्गुण विशेषण विशिष्टायां अस्यां अमावास्यायां पुण्यतिथौ (*प्राचीनावीतीति*) -------- गोत्राणां वसुरुद्रादित्यस्वरूपाणां पितृ पितामह प्रपितामहानां मातृ पितामही प्रपितामहीनां ----------- गोत्राणांनां वसुरुद्रादित्यस्वरूपाणां सपत्नीक मातामह मातु: पितामह मातु: प्रपितामहानां च अक्षयतृप्त्यर्थंप्यर्थं अमावास्यापुण्यकाले वर्गद्वयपितृ न् उद्दिश्य दर्शश्राद्धाङ्गं तिलतर्पर्मणं करिष्ये ‖ (*उपवीतीति*) अपौपस्पृश्य (*प्राचीनावीतीति*) आयात पितर: सोम्या: गम्भीरै: पथिभि: पूर्व्यै: प्रजां अस्मभ्यं ददतो रयिश्चक्ष दीर्घायुत्वञ्च शतशारदञ्च ‖ अस्मिन् कूर्चे वर्ग्ङ्वयद्वय पितृ न् आवाहयामि ‖ सकृदाच्छिन्नं बर्हि: ऊर्णामृदुस्योनं पितृभ्यस्त्वा भराम्यहम् ‖ अस्मिन् सीदन्तु मे पितर: सोम्या: पितामहा: प्रपितामहाश्चानुगै: सह वर्गद्वयपितृ णां इदमासनम् | सकलाराधनै: स्वर्चितम् |

उदीरतां अवर उत्परास उन्मध्यमा: पितर: सोम्यास: | असुं य ईयु: अवृका ऋतज्ञा: तेनोऽवन्तु पितरो हवेषु ‖ -------- गोत्रान् --------- शर्मण: वसु रूपान् पितृ न् स्वधानमस्तर्पयामि ‖

अङ्गिरसोन: पितरो नवग्वा अथर्वाणो भृगवस्सोम्यास: तेषां वयँ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम | -------- गोत्रान् --------- शर्मण: वसु रूपान् पितृ न् स्वधानमस्तर्पयामि ‖

आयुयान्तु न: पितर: मनोजवस: अग्निष्वात्ता: पथिभि: देवयानै: ‖ अस्मिन् यज्ञे स्वधयामदन्तु अधिब्रुवन्तु ते अवन्तु अस्मान् | -------- गोत्रान् --------- शर्मण: वसु रूपान् पितृ न् स्वधानमस्तर्पयामि ‖

ऊर्जं वहन्ती: अमृतं घृतं पय: कीलालं परिस्रुतंस्कुतं स्वधास्थ तर्पयत मे पितृन्न -------- गोत्रान् --------- शर्मण: रुद्र रूपान् पितामहान् स्वधानमस्तर्पयामि ‖

पितृभ्य: स्वधाविभ्य: स्वधानम: | पितामहेभ्य: स्वधाविभ्य: स्वधानम: | प्रपितामहेभ्य: स्वधाविभ्य: स्वधानम: अस्मिन् अक्षन् -पितर: -------- गोत्रान् --------- शर्मण: रुद्र रूपान् पितामहान् स्वधानमस्तर्पयामि ‖

येचेह पितर: ये च नेह याँश्च विद्म याँ उचन प्रविद्म | अग्ने तान् वेत्थ यदि ते जातवेद: तया प्रत्तँस्वधयाध्या मदन्ति -------- गोत्रान् ------- शर्मण: रुद्र रूपान् पितामहान् स्वधानमस्तर्पयामि ‖

मधुवाता ऋतायते मधुक्षरन्तिध्व्क्षरन्ति सिन्धवः माध्वी: नः सन्त्वोषधीः | -------- गोत्रान् --------- शर्मणः आदित्य रूपान् प्रपितामहान् स्वधानमस्तर्पयामि ||

मधुनक्तं उतोषसि मधुमत्पार्थिवँरजः मधुद्यौः अस्तुनः पिता || -------- गोत्रान् --------- शर्मणः आदित्य रूपान् प्रपितामहान् स्वधानमस्तर्पयामि ||

मधुमान्नो वनस्पतिः मधुमाँअस्तु सूर्यः | माध्वीर्गावो भवन्तु नः -------- गोत्रान् --------- शर्मणः आदित्य रूपान् प्रपितामहान् स्वधानमस्तर्पयामि ||

--------- गोत्राः ------- नाम्नीः/ दाः वसुरूपाः मातृः स्वधानमस्तर्पयामि || (एवम् त्रिः )

